Substance—Palm leaf. Size—16 × 1¾ inches. Leaves—67. Lines—5 to a Page. Script—Telugu. No. of Granthas —1005. Author—Maṇikaṇṭha. Complete. Not printed.

Beginning:

न्यायरत्नप्रसादेन तमःप्रशमहेतुना ।
हस्तामलकवत्प्राज्ञः सर्वं जानीत सम्प्रति ॥

अनुमानविदा नव्यव्याप्तिज्ञानस्य कारणम् ।
आदौ तर्कं निरूप्येह पश्चादन्यन्निरूप्यते ॥

तथा हि । किमनुमितौ तर्कस्साक्षात्करणमन्यथा वा कारणम् । तत्र लिङ्गपरामर्शः करणमनुमितौ । तच्च व्यापारवद्भवति । व्यापारस्य चान्यथानुपपत्त्या तर्क एव तद्व्यापार इत्यनुमितौ तर्कस्य साक्षात्कारणत्वमिति वदन्ति ।

End:

पर्वतातिरिक्तान्यवह्निमद्वृत्तिधर्मशून्यप्रमेयत्वादिति ।

दशावताराद्नुमानखण्डनं

करोति वैकुण्ठाधियं स्वपक्षगः ।

दशावताराद्नुपानखण्डनं

करोति वैकुण्ठाधियं स्वपक्षगः ॥

तद्विस्तरस्तु प्रकरणान्तराद्नुसन्धेयम् ।

Colophon:

इति श्रीमणिकण्ठेन .... सतां कर्णभूषणम् ।

सत्प्रकाशचमत्कार्यकारि.. मनोहरम् ॥

यद्विवेचनचातुर्यं यद्ग्रन्थग्रथनौचिती ।

तनोति मुनिमूर्धन्यः गौतम...कौतुकम् ॥

जानन्ति ... नैव बहवो परप्रयासं

ज्ञात्वापि हन्त कुटिला त्रिमतिं भजन्ते ।

ते केचिदेव भुवि कान्तमणिप्रभावा

येषां मनः पर........तामुपैति ॥

गुरुत्वादवगाहन्ते आशयस्तन्महाशयः

उ...स्वन्ते तु... श्वित्वा वन्तः शून्यइ्गास्ततः ।

तीरगुत्तीर्थमिश्रोक्तम्म... राजधर्माधिकारि

मणिकण्ठकृतन्यायरत्नंनाम प्रकरणं समाप्तम् ॥

श्रीगुरुभ्यो नमः ॥

Subject: Nyāyaratnam.

Remarks:—The Ms. is in fairly good condition.

Maṇikaṇṭha, the author of the Nyāyaratna—a work dealing with the philosophical tenets of Gautama—should be referred to the 18th century A. D. More about him is unknown at present. Dr. Burnell, has noted under 'Fragments that have not been identified', this and the following Ms.

॥ न्यायरत्नम् ॥

6541. NYĀYARATNAM.

Burnell's Catalogue No. 10962. Page 121. Right column. Substance—Palm leaf. Size—16¾ × 1¼ inches. Leaves —66. Lines—7 to a Page. Script—Grantha. No. of Granthas—1005. Author—Maṇikhaṇṭha. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6540.

Remarks:—The Ms. is in decaying condition.

॥ न्यायलीलावती ॥

6542. NYĀYALĪLĀVATĪ.

Burnell's Catalogue No. 10968. Page 122. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—93. Lines—4 to a Page. Script—Telugu. No. of Granthas—2200. Author—Śrīvallabha. Complete. Printed.

Beginning:

नाथः सृजत्यवति यो जगदेकपुत्र-

प्रीत्या ततः परमनिर्वृतिमादधाति ।

तस्मै नमः सहजदीर्घकृपानुबन्ध-
लब्धत्रितत्त्वतनवे पुरुषोत्तमाय ॥

द्रव्यं नाकुलमुद्गतोगुणगणाः कर्माधिकं श्लाध्यते
जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।
संबन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीक्षा नयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥

षडेव पदार्था इति नियमव्यवच्छेद्यं प्रतीतं न वा

End:

न च कर्मणि तथात्वम् । दूरादूरघनाघनोन्नतरसं योग-
मात्रेण कर्मज्ञानात् । नाददर्शनात् । न च वेगस्यैकत्वे
कर्मसन्तप्तरूवरःविवेगमन्तानोपरमवदुपपत्तेः ।

Colophon:

इति श्रीन्यायाचार्यश्रीवल्लभविरचितायां न्यायलीलावत्यां प्रक्रियाप-
रिच्छेदस्तुरीयः लीलावत्यां ग्रन्थः समाप्तः ।

शुभमस्तु । श्रीविश्वनाथाय नमः

Subject: Nyāyalīlāvatī

Remarks:—The Ms. is in a fairly good condition.

Śrī Vallabha, the author of the Nyāyalīlāvatī is later than Udayanācārya whom he mentions in his work and is earlier than the beginning of the 13th century. This independent work on Nyāya is based on and planned after Praśastapāda's Padārthadharmasaṃgraha. He is the holder of certain peculiar views. It is said that Praśastapāda had a commentator called Śrīvatsa and that the commentary of his was called Nyāyalīlāvatī. If the identity of Śrīvatsa and Śrīvallabhācārya is established, we have to take this work as the com-

mentary on the Bhāṣya of Praśastapāda.

This work has been printed in the Benares Sanskrit Series No. 151. It has also been published from Bombay in 1915.

॥ न्यायलीलावती ॥

6543. NYĀYALĪLĀVATĪ.

Burnell's Catalogue No. 12351. Page 122 Right column. Substance—Paper. Size—11½ × 3½ inches. Sheets—144. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Śrīvallabha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6542.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायलीलावतीटीका—प्रकाशः ॥

6544. NYĀYALĪLĀVATĪṬĪKĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 12352. Page 123. Left column. Substance—Paper. Size—10 × 8¾ inches. Sheets—305. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—3900. Author—Vardhamāna. Incomplete. Wants end. Not printed.

Beginning:

एकत्र शूलमपरत्र विसप्रसून-
मन्यत्र रुचिरपत्र च पीतवासः ।
त...वर्ष्मशशलक्ष्मकला किरीट-
निष्पिष्टकैटभहृदोऽमम वाञ्छितानि(?) ॥ २१ ॥

न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥ २ ॥

विशिष्टशिष्टाचारानुमितकर्तव्यताकविघ्नविघातकं नमस्कारं निबध्नाति नाथ इति ।

End:

ननु यत्र समवायो विशेषणं तत्र विशिष्टव्यवहारोऽस्ति । न च तत्र सम्बन्ध इत्यनैकान्तिकमित्याह । तत्क्षमानिति । तन्तुमत्त्वं तन्तुसमवायः । पूर्वमप्राबाधितत्वेन...

Subject; Līlāvatīprakāśa.

Remarks:—The Ms. is old and is in good condition. North Indian script.

This Vardhamāna is the same as Gaṅgeśa's son, the great commentator of many famous works on Nyāya.

॥ न्यायसिद्धान्ततत्त्वम् ॥

6545. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 10907b. Page 118. Right column. Substance—Palm leaf. Size—17¾ × 1¼ inches. Leaevs—19. Lines—8 to a Page. Script—Grantha. No. of Granthas—480. Author—Śrīnivāsa. Incomplete. Wants end Not Printed.

Beginning:

यत्पादयुग्मसरसीरुहलग्नचित्तो
दैत्येन्द्रसूनुरतिलङ्घितविघ्नजातः ।

आतस्तमिन्दुधवलं वरदं नतेभ्यो
देवास्त्रिनेत्रममृतं नृहरिं भजामः ॥

श्रीमान्श्रीध्रुवकाश्यपान्वयसुधावाराांनिधौ चन्द्रमाः
नम्राऽनन्तयदेशिकस्य तनयः श्रीश्रीनिवासस्य यः ।
ख्यातस्तर्कवितर्कसंशयमहामोहान्धकारच्छिदो
दक्षो यस्य विपक्षपक्षदृषदां टङ्कायमाना गिरः ॥

सिद्धान्ताक्षेपलेखा सुरसरिमादिताक्लोचनाहीशबद्ध-
प्रज्ञामन्थाचलेन्द्रप्रमथनजनितादम्भसंक्षोभभाजः ।
तर्काकूपारमध्यादमृतमुदहरन्न्यायासिद्धान्ततत्वं
धीमान्स श्रीनिवासो विबुधगणमुदे तार्किकाणां वरिष्ठः ॥

पदार्थो द्विविधः । भावोऽभावश्चेति । भावः षड्विधः ।
द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । द्रव्यं पृथिव्य-
प्तेजोवाय्वाकाशकालदिगात्ममनो भेदान्नवैव । गुणो-
ऽपि चतुर्विंशतिप्रकारः । रूपरसगन्धस्पर्शसंख्यापरिमा-
णपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व स्नेहशब्द-
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदात् । कर्म
च पञ्चविधम् । उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभे-
दात् । सामान्यञ्च द्विविधम् । परमपरञ्च । परञ्च सर्व
सामान्यव्यापकम् । तच्च सत्तारूपम् । अपरञ्च द्विविधम् ।
एकं सर्वसा....प्यम् । तच्च चैत्रीयत्वादि ।

End:

बहूनां रूपाणां चित्रप्रत्यक्षव्यवहारविषयत्वस्य तन्नि-
यामकत्वस्य च कल्पनमपेक्ष्य एकस्यैव चित्ररूपस्य तद्वि-
षयत्वं तन्नियामकत्वकल्पनाया लघुत्वात् । न चोदाहृत-
स्मरणाविरोधः । तस्य वर्णाभिन्नलोहित्यवान् मुखपुच्छा-
वच्छिन्नपाण्डुरवान् मुखविषाणावच्छिन्नयः स नीलो
वृष इत्यर्थात् । एतेन त्रिश्वेता सक्तकीत्यादिकं व्याख्या-
तम् । गन्धो रसश्च न चित्रः । न वा अव्याप्यवृत्तिः माना-
भावात् । ननु रसोऽव्याप्यवृत्तिः ।

Subject: Nyāyasiddhāntatattva also known as 'Nyāyasiddhāntamañjarītattva.

Remarks:—The Ms. is in a fairly good condition.

The other work contained herein is

तर्कभाषाटीका तत्त्वप्रबोधिनी

There are eleven fragmentary leaves in the middle dealing with the same subject and also with Subhāṣita.

Dr. Burnell does not notice this work under this number.

Śrīnivāsa, the author of the Nyāyasiddhāntatattva, a short syncretic digest of Nyāyavaiśeṣika belonged to the Naidhruvakāśyapagotra and was the son of Ananta Deśika. Evidently he was a Śrī Vaiṣṇava Brahmin of South India.

॥ न्यायसिद्धान्ततत्त्वम् ॥

6546. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 10969 Page 121. Left column.

Substance—Palm leaf. Size—17½ × 1½ inches. Leaves

—47. Lines—7 to a Page. Script—Telugu. No. of Granthas—1300. Author—Śrīnivāsa. Complete. Not printed.

Beginning—Same as No. 6545.

End:

स्पन्दः समानं सामान्यं विशेषः समवायकः ।
अभावः सप्रपञ्चश्च निरुपाधिर्निरङ्कुशः ॥

Colophon:

इति श्रीनिवासविरचिते न्यायसिद्धान्ततत्त्वं संपूर्णम् ।
श्रीरघुपतये नमः ।

Subject: Siddhāntatattvam.

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell notices this Ms. on p. 121 as an unidentified fragment.

॥ न्यायसिद्धान्ततत्त्वं ॥

6547. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 2273. Page 122. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—35. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Śrīnivāsa. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6545.

End:

अन्यथा तथाविधानां तादृशात्यन्ताभावानां तत्सम्ब-

न्थानाञ्च तदुत्पत्तिविनाशानां तत्कार्यकारणभावानां त-
त्प्रतियोगिकतदनुयोगिकभेदानाञ्च कल्पने गौरवात्।
भवानीशङ्करार्पणमस्तु ॥

Subject: Nyāyasiddhāntatattva.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसारः ॥

6548. NYĀYASĀRAḤ.

J. L. Collection No. 917. Substance—Paper. Size—8½×4 inches. Sheets—198. Lines—10-12 to a Page. Script—Devanāgarī. No. of Granthas—4250. Author—Mādhavadeva. Complete. Printed.

Beginning:

नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधम्।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेऽधुना॥

यद्यप्यभिमतकर्मारम्भपूर्वसमये सर्वेऽपि शिष्टाः मङ्गलमाचरन्ति। तस्य च न समाप्तिः फलम्। कृतेऽपि मङ्गले असमाप्तेः। अकृतेऽपि समाप्तेश्च। नापि विघ्नध्वंसः प्रमाभावात्।

End:

यथा दशनिरूपितमेकं धनस्वत्वमिति केचित् प्रमाणप्रमेयादीनामत्रैवान्तर्भावात्। शक्तिसादृश्यादीनामतिरिक्तत्वनिरासाच्च सप्तैव पदार्थाः।

Colophon:

इति श्रीमाधवदेवविरचितो न्यायसारः समाप्तिमगमत् ॥
त्रिश्वनाथेन लिखितं भास्करार्थं परार्थञ्चेति लेखकपाठकयोः शुभं भवतु ॥

Subject: Nyāyasāra.

Remarks:—The Ms. is in a fairly good condition.

This Ms. originally belonged to the famous Gambhīrarāya-bhāratī Dīkṣita and later went into the possession of Bhaṭṭa-Gosvāmin.

Nothing is known of the author of this Nyāya manual, Nyāyasāra, except that his name is Mādhvadeva and that of his guru is Lakṣmaṇa. He seems to have been called Mahādeva also and Lakṣmaṇa, his guru, seems to have been his father also. The work has been published in "the Pandit" New series—Vols. XXV., XXVI. It has also appeared therefrom, as a reprint.

॥ न्यायसिद्धान्तदीपः ॥

6549. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10982. Page 119. Right column. Substance—Palm leaf. Size —19½ × 1½ inches. Leaves—77. Lines—8 to a Page. Script—Grantha. No. of Granthas—2464. Author—Śaśadharaśarman. Complete. Printed.

Beginning:

ध्वंसितपरासिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरशर्मा प्रकाशयति ॥

धारणीयः प्रयत्नेन सत्तर्कस्नेहसुप्रभः ।
न्यायसिद्धान्तदीपोऽयं कथासु विजिगीषुभिः ॥

इह तावदभीष्टकर्मणो निर्विघ्नेन परिसमाप्तिमुद्दिश्य बहुशः प्रवर्तमाना विनायकार्चनदधिदूर्वादौ मङ्गले दृश्यन्ते । ते प्रेक्षावन्तः तत्र मङ्गलस्य तद्विशेषस्य वा नमस्कारस्य दुरिताद्युत्सारणद्वारा अभीष्टसमाप्तिप्रति कथमुपायत्वं ग्राह्यम् ।

End:

तस्मात् भ्रममूलकतया व्युत्पत्तिग्रहो न समीचीन एव स्यादित्याद्युत्पत्तिग्रहस्य भ्रममूलकत्वेऽप्यप्रसमीचीनत्वोपरक्ते....स तपोऽतप्यत इत्यादिश्रुतेरणिमादिप्रातिपादकश्रुतेश्च धर्माधर्मनित्यत्वज्ञानादिकमपि ईश्वरेऽङ्गीकुर्वन्तीति सर्वमवदातम् ।

Colophon:

इति महोपाध्याय शशधरविरचितानि प्रकारणानि समाप्तानि

शुभमस्तु । गुरुभ्यो नमः ॥

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in good condition.

Mahopādhyāya Śaśadharaśarman was a native of Mithilā. He quotes Udayanācārya and his Vyāptilakṣaṇa is quoted by Gaṅgeśopādhyāya. He seems to have been the contemporary of one Maṇidhara. He must have lived about 1125 A. D. He has written besides this work, Nyāyanaya or Nyāyamīmāṃsāprakaraṇa and Śaśadharamālā.

This work, Nyāyasiddhāntadīpa, with the prabhā of Śeṣānanta has appeared in 'the Pandit'—New series. Vols. XXV XLII.

॥ न्यायसिद्धान्तदीपः ॥

6550. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10935. Page 119. Right column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—31. Lines—7 to a Page. Script—Grantha. No. of Granthas—650. Author—Śaśadhara. Incomplete. Wants end Printed.

Beginning—Same as No. 6549.

End:

नवैवमुपाधिशङ्कादूषिकैव न स्यादिति वाच्यम् । वि-
शेषोपस्थित...उपाधित्व....णात् । यत्तु विकल्प्य दूषणं
कृतं तद्दूषणमेव । यावत्साध्यव्यापकस्याप्य....

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in a fairly good condition. There is a loose leaf at the beginning dealing with the same subject.

॥ न्यायसिद्धान्तदीपः ॥

6551. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10984. Page 119. Right column. Substance—Palm leaf. Size—14 × 1½ inches. Leaves—25. Lines—8 to a Page. Script—Grantha. No. of Gran-

thas—600. Author—Śaśadharaśarman. Incomplete. Wants end. Printed.

Beginning—Same as No. 6549.

End:

एवंविधदुःखध्वंसपरत्वे लक्षणा प्रसङ्गादित्याहुरिति संक्षेपः

Colophon: इत्यपवर्गवादः १० ॥

Subject: Nyāyasiddhāntadīpa.

		leaves.
1	मङ्गलवादः	1—3
2	अन्धकारवादः	3—7
3	कारणतावादः	7—9
4	पदशक्तिप्रकरणम्	9—17
5	मनोऽणुत्ववादः	17—19
6	शब्दस्वातन्त्र्यवादः	19—20
7	अपवर्गवादः	20—30

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तदीपः ॥

6552. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10935. Page 119. Right column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—40. Lines—5 to a Page. Script—Telugu. No. of Granthas—520. Author—Śaśadharaśarman. Incomplete. Printed.

Beginning:

इह तावदभीष्टकर्मणोनिर्विघ्नपरिसमाप्तिमुद्दिश्य

Same as No. 6550.

End:

कतिपयव्यक्तेः संनिकर्षे मानाद्यासंनिहितातीतानवगतव्यक्तिविषयकं ज्ञानं चक्षुरादि नात्र जन्यते । न च चक्षुरादिनाऽसान्निकृष्टज्ञान जननेऽतिप्रसङ्गः ।

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in a decaying condition.

॥ न्यायसिद्धान्तदीपः ॥

6553. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10986. Page 119. Right column. Substance—Palm leaf. Size—16¾ × 1¾ inches. Leaves—39 (26-64). Lines—8 to a Page. Script—Grantha. No. of Granthas—1920. Author—Śaśadhara. Incomplete. Wants end. Printed.

Beginning—Same as No. 6550.

End:

भूतज्ञानं यदा तु तथाभूतो भ्रमो भवति तदा प्रवर्तेत इति स्वर्गार्थे चिकीर्षाजन्यकृतित्वेन रूपेण यत्कृतिसाध्यं तज्ज्ञानस्य प्रवर्तकत्वमिति पूर्वपक्षसंक्षेपः । अत्रोच्यते.... ।

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in good condition.

॥ न्यायसिद्धान्तदीपव्याख्या ॥

6554. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ.

Burnell's Catalogue No. 10937. Page 119. Right column.
Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—115. Lines—8 to a Page. Script—Grantha. No. of Granthas—1300. Bhiṣagrāja alias Śeṣānanta. Incomplete. Printed.

Beginning:

कल्याणाचलकोदण्डं कमलाकान्तसायकम् ।
कल्लोलमालितूणीरं कलये पुरशासनम् ॥

सङ्केतं प्राप्य राधारहितमथ हरिः शङ्कयागत्य दृष्ट्वा ।
तच्छ्वश्रूं द्वारि वृद्धान् निकटगृहवधूवेषधारी सशङ्काम् ।
तत्तत्स्वीकारभाषागतिहसितमुखैर्वञ्चयन्नेत्य गेहं
राधामालिङ्ग्य गाढं रतिमुदितमनाः श्रेयसे भूयसेऽस्तु ॥

अवलम्बे कृपालम्बमम्बां शैलोन्नतस्तनीम् ।
लम्बोदरञ्च स्कन्दञ्च कम्बुकुन्देन्दुसन्निभम् ॥

अपश्चिमादुदयते भिषग्राजा द्विपश्चिताम् ।
प्रभाविद्वच्चकोरेभ्यो व्याख्या शशधरस्य तु ॥

स्वपक्षरक्षापरिपन्थिकक्ष्या
शिक्षाप्रगल्भोक्तिभरो भिषग्राट् ।
व्याख्यां विशेषेक्षितपक्षिलाक्ष-
पादप्रबन्धः कुरुते प्रभाख्याम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टेष्टदेवतानमस्कारं कृतं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ॥ स्वंसितेति ॥

End:

ननु बाधकाभावात्कथमभावत्वमित्याशङ्क्याह । तथात्व इति । तारत्वमन्दत्वे जात्युत्कर्षापकर्षं रूपत्वाज्ञातित्वगकारादिप्रवृत्तित्वे... ।

Subject: Nyāya Siddhāntadīpavyākhyā—prabhā.

Remarks:—The Ms. is in a fairly good condition.

Bhiṣagrāja, who belonged to the family of Bhādarāyaṇa is the author of the Prabhā—a commentary on the Siddhāntadīpa of Śaśadharamiśra.

Though the name of the author is given as Bhiṣagrāja, the real name seems to have been Śeṣānanta. He is identical with the author of the commentary on Rucidatta's Prakāśa described under No. 6122 and of the work called Padārthacandrikā described under No. 5979.

This work has been published in the series 'The Pandit' of Benares. Vol. XXV-XLII.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6555. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10938a. Page 119. Right column. Substance—Palm leaf. Size—$14\frac{1}{2}\times1$ inches. Leaves—48. Lines—10 or 11 to a Page. Script—Grantha. No. of 595

Granthas—1290. Author—Bhiṣagrāja. Incomplete. Printed.

Beginning—Same as No. 6554.

End:

ननु महाजनानामेवं कामे कुर्यामिति सङ्कल्पोऽभिलाष· पूर्वकयागादौ प्रवृत्त्यादिप्रमाणं । कस्मान्न निराक्रियत इत्याशङ्कयाह । आस्तां विस्तर इति ॥

Colophon:

विधौ शशधरोदिते विविधमूढभावावृते
भिषक्नृपविवृद्दाप्रभाविवरणेन विद्योदिते ।
विशुद्धविजयश्रियासुदृढमादरालिङ्गिता
निरूढपरिबन्धनो जगति गौतमीयाः कृताः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

(Leaf—म)

बादरायण + विपश्चिता ।
भूयोदर्शनवादोऽयं विस्तरेण प्रपश्चितः ॥ १९ ॥

Subject: Nyāya Siddhāntadīpavyākhyā Prabhā.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is a copy of the same work.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6556. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10938b. Page 119. Right column.

Substance—Palm leaf. Size—14½ × 1 inches. Leaves—100. Lines—10 to a Page. Script—Grantha. No. of Granthas—3000. Author—Bhiṣagrāja. Incomplete. Printed.

Beginning—Same as No. 6554.

End:

अनन्येति । अनन्यलभ्यः शब्दार्थः अन्वयसत्वाकाङ्क्षा-
दि लभ्य इति त्वया व्यवस्थापितत्वादित्यर्थः । वस्तुतो
मन्मतेऽपीदं शक्तित्वं गोपदस्य व्यक्तिः

Colophon: (Leaf No. 40.)

बादरायण + विपश्चिता ।

टीका सहजशक्तेस्तु विस्तरेण प्रपञ्चितम् ।

(Leaf No. 53)

बादरा + वा ॥

प्रभांशशधरस्यार्थे गन्धमातनुते भृशम् ।

Subject: Nyāya Siddhāntadīpavyākhyā Prabhā. The other work contained herein is a copy of the same.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6557. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10939. Page 119. Right column.

Substance—Palm leaf. Size—16½ × 1¼ inches. Leaves—123. Lines—6 to a Page. Script—Grantha. No. of Gran-

thas—1476. Author—Bhiṣagrājā. Incomplete. Printed

Beginning—Same as No 6554.

End:

.... स्वरसोद्भावनं तद्बीजम्

Colophon:

बादरायणवंश्येन भिषग्राजाविपश्चिता ।

वादो हि मोक्षनामायं सप्रपञ्चं निरूपितः ॥

Subject: Nyāya Siddhāntadīpāvyākhyā; Up to Mokṣavāda.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6558. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10955. Page 121. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—10. Lines—8 to a page. Script—Grantha. No. of Granthas—200. Author—Bhiṣagrāja. Incomplete. Maṅgalavāda only. Printed.

Beginning:

सङ्कृतं प्राप्य + श्रेयसे भूयसेऽस्तु ।

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टेष्टदेवतानमस्कारं कृतं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते । च्वंसितेति ॥

End:

परिहारस्तूक्त एव इति भावः । उक्त एवात्र परिहारः

कामनायां प्रारिप्सितत्वप्रवेशस्तु विषयमाहात्म्यानन्तर्यक एवेति

Colophon:

बादरायणवंश्येनभिषग्राजविपश्चिता ।

वादोमङ्गलनामायं बहुमङ्गलभागहृत् ॥

इति मङ्गलवाद समाप्तः ॥

Subject: Nyāya Siddhāntadīpavyākhyā—Prabhā

Remarks:—The Ms. is in a fairly good condition.

न्यायसिद्धान्तदीपव्याख्या—प्रकाशः or न्यायरत्नम् ॥

6559. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRAKĀŚAḤ OR NYĀYARATNAM.

Burnell's Catalogue No. 10940. Page 119. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—507. Lines—9 to a Page. Script—Telugu. No. of Granthas—1840. Author—Dharmarāja. Incomplete. Not printed.

Beginning:

मखिलकुलतुलितं कण्ठमाणिक्यसंज्ञम् ।

व्याकुर्वन् यः...............

.........णेः पङ्क्तिदीपातिभागं

सोऽयं कौण्डिन्यगोत्रः शशधर......... ॥

आलेर्विशदमतिततरां धर्मराजो बुधेन्द्रः ॥

स्फुरन्ति दूषणानीह पूर्वटीकासु यद्यपि ।

तथापि न विलिख्यन्ते ग्रन्थगौरवभीतितः ॥

End.

सामान्यप्रत्यासत्या...वन्तरेण । व्याप्तिग्रहवेलायां प-

क्षीय...व्यवगीतत्वेन दोषाभावात् तदेतदाह

Colophon: Leaf No. 50

...इति धर्मराजभट्टविरचिते न्यायसिद्धान्तदीपप्रकाशे न्यायरत्ने मोक्षवादः समाप्तः ।

Subject: Nyāyaratna a commentary on Śaśadhara's Nyāyasiddhāntadīpa, otherwise known as Prakāśa.

Remarks:—The Ms. is in a fairly good condition.

Dharmarāja of Kaṇḍaramāṇikkam, the author of this work is identical with the author of a commentary on Rucidatta's Prakāśa vide infra 6. He is also the author of the Yuktisaṅgraha & the Vedāntaparibhāṣa.

॥ न्यायसिद्धान्तमञ्जरी ॥

6560. NYĀYASIDDHĀNTAMAÑJARĪ.

Burnell's Catalogue No. 2127. Page 119. Left column. Substance—Paper. Size—14 × 6 inches. Sheets—39. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Jānakīnāthaśarman. Complete. Printed.

Beginning:

प्रणम्य परमात्मानं जानकीनाथशर्मणा ।

क्रियते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥ १ ॥

इह किल निखिललोकनिःश्रेयसमुख्योपायं मननोपाय-

मात्मनस्तत्त्वज्ञानमामनन्ति । तच्च प्रमाणाधीनमिति प्रमाणं

निरूप्यते । तत्र प्रमायाः करणं प्रमाणम् । प्रमा तु यथा-

र्थानुभवः ॥

End:

ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेत् रजतत्वप्रका-

रकं प्रत्यक्षमित्यवेहि । तत्रैव किं मानमिते चेत् तत्प्रका-

रिका प्रवृत्तिरिति संक्षेपः ।

Colophon:

इति भट्टाचार्यचूडामणिविरचिता । न्यायसिद्धान्तमञ्जरी समाप्तिं गता ।

शके १७३४

अंगिरोऽब्दे भाद्रशुक्लद्वितीयायेन्दुवासरे ।

शारभेन्द्राश्रितो गुण्डुरलिखन्न्यायमञ्जरीम् ॥

Subject: Nyāyasiddhāntamañjarī.

Remarks:—The Ms. is in a fairly good condition.

Jānakīnātha Śarman is the author of the Nyāyasiddhānta-mañjarī, an independant treatise on Nyāya. He seems to have lived about 1550 A D.

The Ms. is dated second day of the bright half of Bhādrapada month of Āṅgirasa year of Śaka 1734 or 7th September 1812 A. D.

This work has been published in 'the Pandit' new series—Vols. XXIX—XXXIV. There appears also, along with it, a commentary upon it, by Śrī Yādavācārya, called Sāra.

॥ न्यायसिद्धान्तमञ्जरी ॥

6561. NYĀYASIDDHĀNTAMAÑJARĪ.

Burnell's Catalogue No. 10832. Page 119. Left column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{3}{4}$ inches. Leaves—31. Lines—7 to a Page. Script—Telugu. No. of Granthas—1000. Author—Jānakināthaśarman. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6560.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तमञ्जरी ॥

6562. NYĀYASIDDHĀNTAMANJARĪ.

Burnell's Catalogue No. 10833. Page 119. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{3}{4}$ inches. Leaves—26. Lines—8 to a page. Script—Grantha. No. of Granthas—1000. Author—Jānakinātha. Complete. printed.

Beginning, end, colophon and subject—Same as No. 6560.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तमञ्जरी ॥

6563. NYĀYASIDDHĀNTAMAÑJARĪ.

Burnell's Catalogue No. 10834. Page 119. Left column. Substance—Palm leaf. Size—$16 \times 1\frac{1}{4}$ inches. Leaves—36. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—600. Author—Jānakīnāthasarma. Incomplete. Printed.

Beginning—Same as No. 6560.

End:

...भूतलोऽघट इत्यत्रत्वत्यन्ताभाव एवेत्यत्र किं नियामकम् । अधि(करण)वाचकपदे सप्तमी विभक्तिर्हि अत्यन्ताभावबोधे तन्त्रम् । प्रतियोग्यनुयोगिपदयोः समानविभक्तिरन्योन्या...... ।

Subject: Nyāyasiddhāntamañjarī.

Remarks—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तमञ्जरी ॥

6564. NYĀYASIDDHĀNTAMAÑJARĪ.

S. S. Collection No. 55.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—57 (2-58). Lines—9—12 to a Page. Script—Devanāgarī. No. of Granthas—990. Author—Jānakīnāthaśarman. Wants beginning. Printed.

Beginning:

...तस्य तदनवच्छेदकत्वात् । स्मृतिभिन्नज्ञानत्वमनुभवत्वं जातिविशेषो वा अनुभवामीत्यनुभवप्रतीतेः ।

End—Same as No. 6560.

Colophon:

इति श्रीभट्टाचार्यचूडामणिकृतायां सिद्धान्तमञ्जर्यां शब्दपरिच्छेदः समाप्तः ॥ इदं तर्कपुस्तकं नागेश्वरभट्टसूनुरामाभट्टात्मजगोविन्दाख्यस्य ॥

Subject: Nyāyasiddhāntamañjarī.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तमञ्जरीव्याख्या—तर्कप्रकाशिका ॥

6565. NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ—TARKAPRAKĀŚIKĀ.

Burnell's Catalogue No. 2128. Page 119. Left column. Substance—Paper. Size—14 × 6 inches. Sheets—198. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1900. Author—Śrīkaṇṭhaśarman. Complete. Printed.

Beginning:

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
रोषं मानिनि मा कृथाः त्वदपरा नान्यास्ति वन्द्या मम ।
किन्तुत्वामहमानमामि मनसि ध्यात्वा तवैवाकृती-
रित्थं हर्षितशैलराजतनयाश्लिष्टः शिवः पातु नः ॥

सिद्धान्तगूढवर्त्मैकभावनापरिशीलिता ।
श्रीकण्ठनिर्मिता सेयं कृतिरातनुतां मुदम् ॥

सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिञ्चित्करत्वेन प्रतिबन्धकाभावस्यावश्यमपेक्षणीयतया प्रकृतग्रन्थसमाप्तिप्रतिबन्धकदुरितरूपविघ्नविघाताय कृतं भगवत्स्यात्मकं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति । प्रणम्येत्यादिना । मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धान्तस्थितिः ।

End:

तत्प्रकारिकेति । शुक्तौ रजतत्वप्रकारिका प्रवृत्तिरित्य-

र्थः । प्रवृत्तौ तु इष्टतावच्छेदकप्रकारकज्ञानत्वेन हेतुताया व्यवस्थापितत्वादिति भावः । इदं रजततया जानामीत्यनुव्यवसायोऽपि शुक्तिगोचररजतत्वप्रकारकप्रत्यक्षसाधकोऽध्यवसेय इति

Colophon:

अतिकर्कशतर्के यद्धृदब्जे स्फुरितं मम ।
सिद्धेश्वरीपदद्वन्द्वकरस्यैतद्विजृम्भणम् ॥
योऽसौ काश्यां समुत्पादि विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतां मुदम् ॥ २ ॥

इति श्रीकाशिगर्भसंभवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्मविरचिता तर्कप्रकाशिकाभिधा सिद्धान्तमञ्जरी टीका समाप्ता ॥

अङ्गिरोऽब्दे शुक्लमासे चतुर्दश्यां रवेर्दिने ।
शरभेन्द्राश्रितो ? गुण्डुनाम्नेदं लिखितं मुदा ॥

Subject: Tarkaprakāśikā otherwise known as Śitikaṇṭhīyam a commentary on the Siddhāntamañjarī of Jānakīnāthaśarman.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulphurated.

The author has commented upon the Tattvacintāmaṇi also.

He was the son of Viśvanātha Dīkṣita and lived in Benares.

In the following table, are described briefly, the 10 more Mss. in our library, representing this work.

NYĀYASIDDHĀNTAMANJARĪVYĀKHYĀ called TARKAPRAKĀŚIKĀ.

escriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6566	B. L. 2129a	Paper.	14×6	37	11	Devanāgarī.	Incomplete. Pratyakṣa only.
6567	,, 12334	,,	$12\frac{1}{8} \times 6$	64	10	,,	,, ,,
6568	,, 2129b	,,	14×6	57	11	,,	,, Anumāna only.
6569	,, 2129c	,,	,,	5	11	,,	,, Upamāna only.
6570	,, 2129d	,,	,,	122	11	,,	,, From śabda to the end.
6571	,, 2130	,,	12×6	166	10	,,	,, ,,
6572	,, 2131	,,	$12 \times 5\frac{1}{2}$	201 (354-555)	9	,,	,, wants beginning.
6573	,, 2132	,,	12×6	5	10	,,	,, From Upamāna to the end.

6574	J. L.	918	,,	10×4	91	8	,,	,, Anumāna only.
6575	T. S.	25	,,	11½×5½	7	14	,,	,, From Anumāna: Wants end.

DETAILED REMARKS

on the Mss. of

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ—TARKAPRAKĀŚIKĀ IN THE ABOVE TABLE.

6570 Śrīkaṇṭha begins his Śabdaparicccheda, which is contained in this Ms., thus.

जटाजूटलसद्गाङ्गजलभूषितमस्तकम् ।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥

॥ युक्तिसङ्ग्रहः ॥

6576. YUKTISAṄGRAHAḤ.

Burnell's Catalogue No. 10953a. Page 121. Right column. Substance—Palm leaf. Size—$14\frac{1}{4}\times1\frac{1}{2}$ inches. Leaves—14 (63-76). Lines—10 to a Page. Script—Grantha. No. of Granthas—420. Author—Dharmarāja. Complete. Not printed.

Beginning:

नानाटीकोक्तयुक्तीनामुक्तीतानाञ्च सङ्ग्रहः ।
क्रियते कण्डूमाणिक्यधर्मराजेन धीमता ॥

अनुमितित्वं स्वज्ञानाजन्यज्ञानप्रकारधर्मसमनियतम् ॥

End:

अतो न तत्र व्यभिचार इति वाच्यम्, तथा सति गौरवप्रसङ्गात् । तस्माद्यथोक्तमेवादर्तव्यम् ॥

Colophon: Nil.

Subject: Yuktisaṅgraha.

1 अनुमिति लक्षणम्

2 व्यधिकरणधर्मवादः

3 व्याप्तिवादः

4 पक्षमात्रानुमानम्

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 6266.

The Yuktisaṅgraha, described above is by the famous Dharmarājādhvarin, the author of the Vedāntaparibhāṣā. He was a native of the Village of Kaṇḍaramāṇikka in the Tanjore district and belonged to the 17th century, A. D.

This work is a resume of the arguments of the various writers on the definition of Anumiti.

॥ लक्षणराजिः ॥

6577. LAKṢAṆARĀJIḤ.

Burnell's Catalogue No. 2270. Page 120 Right column.

Substance—Paper. Size—10 × 4½ inches. Sheets—48. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—740. Author—Tippābhaṭṭa. Complete. Not printed.

Beginning:

गिरिजामोदकं विघ्नोदकं करमोदकम् ।
स्तौमीष्टदायकं लम्बनायकं गणनायकम् ॥

भक्तानुरक्तां नित्यासद्भूषणां मणिभूषणाम् ।
वेणीविलसितां वाणीमेणीदृशमहं भजे ॥

सर्वदा सर्वदात्रे सद्धर्मिणे परमात्मने ।
असकृष्टाय कृष्णाय त्रिष्णवे जिष्णवे नमः ॥

सर्वतन्त्रनिपुणस्य वादिनश्चिट्टिभट्टविदुषः सुतेन च ।
तिप्पयाख्यविदुषाऽर्थसिद्धये कथ्यते कलितलक्षणावली ॥

लक्षणस्य तावत्पञ्चदोषाः । अव्याप्त्यतिव्याप्त्यसंभ-
वात्माश्रयान्यथविशेषणभेदात् ।

End:

एवमुक्तजात्यवान्तरजातिनिरुक्तिरपि आपादनीया ।
अनित्यमात्रवृत्तिसाक्षाद्व्याप्यजातिः कर्मत्वम् । एवं तदवा-
न्तरजातिनिरुक्तिरपि ज्ञेया ।

Colophon:

मीमांसाद्वयतर्कशास्त्रसहितव्याख्यानुशिक्षापदो
वादीन्द्राभिधचिट्टिभट्टविदुषः शिष्येण पुत्रेण च ।
तिप्पाभट्टविपश्चिता विरचिता हृद्याऽनवद्या...
युक्त्या लक्षणराजिरप्रतिहता न्याय्या बुधानां मता ॥

लक्षणराजिः संपूर्णा ॥ श्रीरस्तु ॥

मुल्लेमाणितिम्मणाचार्यपुत्रवेङ्कटाचार्यस्येदं पुस्तकम् ।
तारणाब्दे सिते पक्षे पुष्ये मासि भगोदये ।
लिलेख वेङ्कटः पूर्णां लक्ष्मराजिं हरेर्दिने ॥

लिखितं स्वार्थम् ।

Subject: Lakṣaṇarāji.

Remarks:—The Ms. is in a fairly good condition.

Tippābhaṭṭa, the author of the work, Lakṣaṇarāji is the

son of one ciṭṭibhaṭṭa, who had the title Vādīndra and was master of Pūrva and Uttaramīmāṃsā.

The present Ms. was copied in the cyclic year Tāraṇa.

The work is written on the model of the Lakṣaṇāvali of the great Udayanācārya. It first examines the nature of definition and then proceeds to determine the definition of the categories and substances. This work has not yet been printed.

There is one more work of this kind—called Lakṣaṇāvalī —written by one, Gourīśaṅkara, son of Lakṣmīcandra, which work has been published from Benares.

॥ लक्षणराजिः ॥

6578. LAKṢAṆARĀJIḤ.

Burnell's Catalogue No. 2538. Page 120. Right column. Substance—Paper. Size—14 × 5¾ inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—710. Author—Tippabhaṭṭa. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6577.

Remarks:—The Ms. is in decaying condition.

॥ शब्दशक्तिप्रकाशिका ॥

6579. ŚABDAŚAKTIPRAKĀŚIKĀ.

Burnell's Catalogue No. 2276. Page 121. Left column. Substance—Paper. Size—12¼ × 6 inches. Sheets—157.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Jagadīśa. Complete. Not printed.

Beginning:

तर्कतत्त्वज्ञ विदुषा विदुषां तोषकारिका ।
क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

ग्रन्थारम्भे विघ्नविघाताय समुचितां शब्दमयीं देवतां ग्रन्थकृत्स्मरति स्म ।

मू ॥ अनुभवहेतुः सकलैःसद्यः समुपासिता मनुजैः ।
साकांक्षा सन्ना च स्वार्थे योग्या सरस्वती देवी ॥

इतरा तावद्देवता सम्यगुपासिताप्युपासकेन साकांक्षापि वा नासन्ना आसन्नापि वा न रूपस्योपासकस्याभिलषितार्थे योग्या अपि वा न समस्तोपासके अनुभवस्य जनिका जनिकापि वा न सद्यः अपि तु कालक्रमेणैव ।

End:

अत एव सतोऽणो नलुग्भवेदित्यग्रेऽपि निषेधः । संगच्छत इति बन्धवः । वत्सशालादितस्तु जातार्थकस्य वा लुक् । यथा वत्सशालायां जात इत्यर्थे वत्सशालो वात्सशालश्च वृक्षः । एवमभिजिताभिजितो बालः

वत्सशालाभिजिच्चित्रा रेवती रोहिणी तथा ।
अश्वयुक्मृगशीर्षश्च वत्सशालादिको गणः ॥

Colophon:

इति श्रीमहामहोपाध्याय श्रीजगदीशतर्कालङ्कारभट्टाचार्यकृता शब्दश-

क्तिप्रकाशिका समाप्ता । श्रीकाशीविश्वेश्वरार्पणमस्तु ॥

Subject: Śabdaśaktiprakāśikā.

This is another small work of the great Jagadīśa—dealing with the significatory capacity of words. The author writes in Kārikās and then adds his own gloss thereon.

6580. ŚABDAŚAKTIPRAKĀŚIKĀ.

J. L. Collection No. 919. Substance—Paper. Size—8¼ × 8¼ inches. Sheets—129. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—3080. Author—Jagadīśa. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6579.

Remarks:—The Ms. is in a good condition.

॥ शब्दार्थसारमञ्जरी—कारकवादः ॥

6581. ŚABDĀRTHASĀRAMAÑJARĪ—KĀRAKAVĀDAḤ.

S. K. Collection No. 29.

Substance—Paper. Size—9 × 8¾ inches. Sheets—50. Lines—10 or 11 to a page. Script—Devanāgarī. No. of Granthas—400. Author—Bhavānanda. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः

नत्वा कृष्णपदद्वन्द्वं कारकाद्यर्थनिर्णयः ।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाश्यते ॥

तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम् । संप्रदानादेरनुमितिप्रकाशनद्वारेव तण्डुलादिसंपादनद्वारा संबन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन संबन्धि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः । किन्तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारणत्वं क्रियानिमित्तत्वसहितं मुख्यमिति । स्तोकं पचतीत्यादौ क्रियाविशेषणे अतिव्याप्तिवारणाय विभक्त्यर्थद्वारेति ॥

End:

नामार्थयोः सामानाधिकरण्ये सप्तमी न युक्ता । तथापि न गुणकर्मान्यत्वे सति सत्त्वादित्याद्यभियुक्तप्रयोगदर्शनात् । सूत्रे भावपदं धर्मपरतया व्याख्याय तत्संगमनीयम् यस्य धर्मेण धर्मान्तरं निरुक्तस्वसामानाधिकरण्येन प्रतिपद्यते तत्र सप्तमीति सूत्रार्थः । यस्य क्रिययाऽन्यस्मात्क्रियान्तरं लक्ष्यत इति व्याख्यानन्तु शाब्दिकानां प्रायिकाभिप्रायमिति दिक्

Colophon:

इति शब्दार्थसारमञ्जर्यां भवानन्दवागीशविरचितायां षट्कारकविवेचनं समाप्तम् । संवत् १७८० समये माघकृष्णचतुर्दश्यां

ऽयम्बकभट्टप्रतिष्ठानकरकाण्वशाखिनालिखितोऽयं ग्र-
न्थः सीतारामाभ्यां नमः । श्रीकाल्यै नमः ।

Subject: Śabdārthasāramañjarī, Ṣadkārakavivecana.

Remarks:—The Ms is in a fairly good condition.

This small work of the famous Bhavānanda treats about word and its meaning, This Ms. represents a chapter therein, dealing with the 6 cases It has been published in the II part of the volume called 'Vādārthasaṅgraha'—a collection of Vādagranthas, by Mahādeva Gaṅgādhara Bharke, (Bombay 1913, 14.)

This Ms. was copied in Samvat 1780 (i.e.) A. D. 1723.

॥ शब्दार्थसारमञ्जरी—कारकवादः ॥

6582. ŚABDĀRTHASĀRAMAÑJARĪ—KĀRAKAVĀDAḤ.

Burnell's Catalogue No. 2262 Page 120. Right column.
Substance—Paper. Size—8¾ × 8½ inches. Sheets—11. Lines—10 or 11 to a page. Script—Devanāgarī. No. of Granthas—215. Author—Bhavānanda. Incomplete. Wants end. Printed.

Beginning—Same as No. 6581.

End:

तथा चाजाजन्यफलभागित्वेनोद्देश्यत्वेन प्रामाण्याप्रा-
प्त्या न संप्रदानता । यत्र तु तथोद्देश्यत्वं विवक्ष्यते तथा
ग्रामायाजानीयत इति प्र....

Subject: Kārakavāda a chapter of the Śabdārthasāramañjarī.

Remarks:—The Ms. is in decaying condition.

॥ शब्दार्थसारमञ्जरी--कारकाविवेचनम् ॥

6583. ŚABDĀRTHASĀRAMAÑJARĪ—KĀRAKAVIVECANAM.

Burnell's Catalogue No. 2256. Page 120. Right column.
Substance—Paper. Size— 8¾ × 3½ inches. Sheets—7. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—183. Author—Bhavānandavāgīśa Incomplete. Wants end. Printed.

Beginning:

....नन्वयादिति । विभागे ध्रुवमवधिभूतमित्यर्थः । अवधित्वञ्चस्वरूपसंबन्धविशेषः । प्रतीतिबलात्काभिचेन धावतोऽश्वात्पततीत्यादौ साक्रियाश्वादेरपादानत्वं नानुपपन्नम् ।

End:

सूत्रे भावपदं धर्मपरतया व्याख्याय तत्संगमनीयम् यस्य धर्मेण धर्मान्तरानिरुक्तस्य सामानाधिकरण्ये प्रतिपद्यते तत्र सप्तमीति सूत्रार्थः । यस्य क्रियायामन्यस्य क्रियान्तरं लक्ष्यत इति । व्याख्यानन्तु शाब्दिकाभिप्रायम् ॥

Colophon:

इति शब्दार्थसारमञ्जर्यां भवानन्दवागीशकृतषट्कारकविवेचनं समाप्तिमगमत् ॥

Subject: Sabdārthamañjarī Ṣaṭkārakavivecana.

Remarks:—The Ms. is in a fairly good condition.

॥ शब्दार्थसारमञ्जरी—कारकविचारः ॥

6584. ŚABDĀRTHASĀRAMAÑJARĪ—KĀRAKAVICĀRAḤ.

Burnell's Catalogue No. 2261. Page 120. Right column. Substance—Paper. Size—6½ × 4¾ inches. Sheets—16. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—418. Author—Bhavānanda. Incomplete. Printed.

Beginning:

द्वितीयार्थस्तु 'कर्मणि द्वितीया' इति सूत्रात्कर्मत्वम् । सोऽपि भावनायामेवान्वेति । अत्र विवदन्ते । नवीनतार्किकास्तावत् धात्वर्थानधिकरणत्वे सति धात्वर्थावच्छेदकफलशालित्वं कर्मत्वं ।

End:

कर्त्राख्यातलक्ष्यं कृत्प्रत्ययशक्यतावच्छेदकं कृद्योगनिमित्तकषष्ठ्याबोध्यश्च करणत्वञ्च 'साधकतमं करणम्' इति सूत्रेण ।

Subject: Kārakavicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ सिद्धान्तसारः ॥

6585. SIDDHĀNTASĀRAḤ.

Burnell's Catalogue No. 2272, Page 121. Left column. Substance—Paper. Size—14 × 5¾ inches. Sheets —14. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Rāmabhadra. Incomplete. Wants end. Not printed.

Beginning:

श्रीविश्वेश त्रिभुवनगुरो विश्वमूर्ते त्रिमूर्ते
भूयोभूयः प्रणतिनिवहैरर्चयित्वा भवन्तम् ।
याचे चेतः कलुषितमिदं दोषमूलैः कुतर्कैः
भक्तिं दत्वा निजचरणयोस्त्वद्विशुद्धिं नयेथाः ॥

श्रीरामचन्द्रचरणौ शरणं विधाय
प्रज्ञाततत्त्वनिवहः कुतुकात्क्षणेन ।
श्रीरामभद्रसुकृती कृतिनां हिताय
सिद्धान्तसारमिममद्भुतमातनोति ॥

इह खलु विदितसुखदुःखभावाः स्वभावत एव सुखमसिद्धमिच्छन्तो द्विषन्त एव वा दुःखमन्यदिच्छन्ति द्विषन्ति च ।

End:

न तु समूहालम्बनम्, येन संभाव्येतापि साङ्कर्यम् ।
स्वर्गादीच्छाजन्यतावच्छेदकजातिव्याप्यजातिभिन्न वा-
नाविधस्वर्गादिसाधनताधीजन्यता......॥

Subject: Siddhāntasāra.

Remarks:—The Ms. is in a fairly good condition.

Rāmabhadra alias Rāmacandra, the author of the Siddhāntasāra, is probably the same as the grandson of Jagadīśabhaṭṭācārya, the author of the Śabdaśaktiprakāśa and other works. In that case, this author should have flourished about 1660 A. D.

Rāmabhadra is the author of the Guṇarahasya also, described under No. 5973.

This work has not yet been printed. It seems to be an independent treatise on the philosophy of the Nyāya school.

॥ सिद्धान्तसारः ॥

6586. SIDDHĀNTASĀRAḤ.

Burnell's Catalogue No. 2248. Page 120. Left column.

Substance—Paper. Size—9¾ × 4 inches. Sheets—35. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas — 800. Author—Rāmacandrasūri alias Rāmabhadra. Incomplete. Up to Mokṣavāda only. Not printed.

Beginning—Same as No. 2272.

End:

तदुक्तं भगवद्गीतायाम् ।
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरे जनाः ।
सयत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥
(न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन)
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ।
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ॥

Colophon:

इति सार्वभौमरामचन्द्रसूरिविरचितो मोक्षवादः ।

शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।

दोषाः प्रयान्तु नाशं सर्वे जनाः सुखिनो भवन्तु(?) ॥

Subject: Mokṣavāda—a part of the Siddhāntasāra.

Remarks:—The Ms. is in a fairly good condition.

॥ हरिदीक्षितीयम् ॥

6587. HARIDĪKṢITĪYAM.

Burnell's Catalogue No. 2274. Page 121. Right column. **Substance**—Paper. Size—11⅜ × 5 inches Sheets—81 (62-92). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1086. Author—Haridīkṣita. Incomplete. Not printed.

Beginning:

....न कर्मजातीयेन वा ज्ञानजातीयेन वा समुत्पाद्यत इति क्रमेण वेगभावनयोः प्रथमविशेषणस्यार्थः । स्थित-स्थापकस्य तु कारणगुणपूर्वकत्वेन कर्मजन्यत्वासंभवात् येन कर्मजातीयेन समुत्पाद्यः सहकारिसंपन्नतया विशिष्ट-रूपं लब्धं वा नित्योपचारिकमुत्पन्नत्वमभिप्रेतम् ।

End:

ये त्वज्ञानसिद्धिमुदाहरन्ति देवदत्त इति अदृष्टस्या-स्मदाद्यतीन्द्रियत्वादज्ञानासिद्धौ हेतुरित्यर्थः । सर्वं क्षणिकं सत्वादिति । व्याप्तिज्ञानासिद्धस्योदाहरणम् । इदानीमिहाकाशे परमाणुः कदाचित्...।

(Colophon: Sheet No. 90) इति वितण्डा ॥

Subject: Haridīkṣitīya—a Nyāya manual.

Remarks:—The Ms. is very old and in a brittle condition.

This work is a treatise on the sixteen categories of Nyāya प्रमाणप्रमेय etc. Though a production of that age of Nyāya in which the writers followed the Pramāṇapaddhati inaugurated by Gaṅgeśa, this work follows the scheme of the Prācīna School and takes up the sixteen topics, as enumerated in the sūtras of Gautama.

The author is Haridīkṣita, about whom, nothing more is known.

॥ वादग्रन्थाः, विचाराः, क्रोडपत्राणि च ॥

VĀDAGRANTHAS. etc.

॥ अनुमानप्रामाण्यवादखण्डनम् ॥

6588. ANUMĀNAPRĀMAṆYAVĀDA KHAṆḌANAM.

Burnell's Catalogue No. 2882. Page 121. Left column. Substance—Paper. Size—12½ × 6½ inches. Sheets—5. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—Vedantācārya. Complete. Not printed.

Beginning:

इदं त्ववधेयम् । यथा धूमावच्छेदेन वह्निव्याप्तिनिर्णयात् पक्षधर्मधूमानन्तरमुपनीतव्याप्तिभानं तथा धूमवत्त्वावच्छेदेन वह्निमत्त्वनिर्णयात् वह्निज्ञानं प्रत्यासत्तीकृत्य वन्हिप्रत्यक्षमेवास्तु । किमनुमिति रूपज्ञानान्तरकल्पनया। ननु ज्ञानस्यैव प्रत्यासत्तित्वासिद्धेः कथं तत्र वह्निप्रत्यक्षमिति चेन्न । ज्ञानप्रत्यासत्तेरवश्यं स्वीकरणीयत्वात् ।

End:

किं बहुना । रूपरसादिसमवायिकारणतावच्छेदकद्रव्यत्वमेव स्यात् । न तु पृथिवीत्यादिविशेषत्वेन गौरवात् । गगनादावपि तत्कल्पनागौरवस्यादोषत्वादिति बहुव्याकुलीस्यादित्यलं दूषणपरम्परयेति ।

Colophon:

इति श्रीमीमांसावल्लभनृसिंहाचार्यसुतवेदान्ताचार्यविरचितानुमानपृथक्प्रमाण्यखण्डनं समाप्तम् ।

Subject: Anumānaprāmāṇyavādakhaṇḍanam.

Remarks:—The Ms. is in good condition.

The author of this treatise is one Vedāntācārya, son of Narsimhācārya, a great Mīmāṃsaka. Evidently the author is a Śrī Vaiṣṇava Brāhmaṇa of South India of probably the 17th or 18th century A. D.

॥ बहुव्रीहिवादः ॥

6589. BAHUVRĪHIVĀDAḤ.

Burnell's Catalogue No. 2384. Page 121. Left column.

Substance—Paper. Size—12¼ × 6½ inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—297. Author—Vedāntācārya. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

अथ बहुव्रीहौ चित्रगु[म]मानयेत्यादौ चित्रगोस्वामिनोबोधो न गे(गो)पदस्य चित्रपदस्य उभयपदस्य वा चित्रपदो (त्रगोः) स्वामिनो लक्षण्य(णया)एकपदवैयर्थ्यप्रसङ्गात् । नापि गोपदं गोस्वामिलक्षकं गति चित्रपदर्थास्याभेदेनान्वय इति वाच्यम् । पदार्थैकदेशेऽन्वयस्याव्युत्पन्नत्वात् ।

End:

विभक्त्यर्थश्च भवति । बहुव्रीहौ तु लक्ष्यतावच्छेदक(ः)समस्यपान्नपदार्थविभक्त्यर्थश्च न भवति । तत्पुरुषबहुव्रीहेर्द्वुलेत्वद्भायिद्विगुरपि चाह महिहे नित्यमव्ययीभावः तत्पुरुष[च]कर्मधारयापेह(क्ष)या बहुव्रीहिः ॥

Colophon:

बहुव्रीहिवादः समाप्तः

Subject: Bahuvrīhivāda.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

वेदान्ताचार्यकृता

॥ प्रमेयटीका ॥

6590. PRAMEYAṬĪKĀ.

Burnell's Catalogue No. 2337. Page 121. Left column. Substance—Paper. Size—14 × 5¾ inches. Sheets—55. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1980. Author—Vedāntācārya. Incomplete. Wants end. Not printed.

Beginning:

इह प्रमेयं हेयोपादेयभावेनावस्थितं मुमुक्षुणां प्रतिपित्सितं। तच्च परीक्षितस्वप्रमाणविशेषाधीनं। प्रतिपत्तिलक्षणञ्चास्य प्रमाणविशेषः। न च वा....र प्रमाणसामान्यप्रत्यक्षादिलक्षणमन्तरेणात्मादिप्रमाणावताराशङ्काः कर्तुम्(शक्याः)।

End:

॥ न तर्कोति ॥ युक्तं व्यतिरेकिणि जीवशरीरे धर्मिणि प्राणादिमत्त्वस्य साधनधर्मस्य दर्शनान्नतु यन्नुत्पत्तिमानात्मा भविष्यन्नसंसारापवर्ग उपपत्स्येतामित्यत्रात्मनि धर्मिणि साधनधर्मे उत्पत्तिर....तद्दर्शनं त्वा यतः संस्कारोद्बोधे सति लिं... ।

Subject: Premeyaṭīkā.

Remarks:—The Ms. is in excellent condition.

॥ अन्यथाख्यातिवादः ॥

6591. ANYATHĀKHYĀTIVĀDAḤ.

Burnell's Catalogue No. 2280. Page 120. Right column. Substance—Paper. Size—11¾ × 6 inches. Sheets—15. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas —300. Author—Jayarāmanyāyapañcānana. Complete. Not printed.

Beginning:

अलौकिकप्रत्यासत्तिस्तु ज्ञानलक्षणासामान्यलक्षणायोगजधर्मा भेदा....धा । अथाद्यस्य प्रत्यासत्तित्वे किं बीजमिति चेत् इदं रजतमित्यादिस्मर्यमाणरजतान्यथाख्यात्यनुपपत्तिरिति । अन्यथाख्यातौ किं प्रमाणमिति चेत्

नत्वा शम्भोः पदाम्भोजं नानामतकदम्बिताम् ।
अन्यथाख्यातिमाख्याति जयरामः समासतः ॥

अन्यथाख्यातौ ज्ञानत्वं शुक्तिविशेष्यकत्वावच्छिन्न रजतत्वप्रकारकत्ववद्वृत्ति न वेत्याद्या विप्रतिपत्तयः । विधिप्रसिद्धिरिच्छात्वादौ निषेधस्य च द्रव्यत्वादेव सुलभेति ॥

End:

तच्चिन्त्यम् । निरुक्तकार्यकारणभावेऽपि घटत्वादिसमवायादेश्च सविकल्पकोत्तरं विनश्यदवस्थतज्ज्ञानीयतादृशविषयितासाक्षात्कारस्य दुर्वारत्वादिति कृतं पल्लवितेन ॥

Colophon:

अपरिकलितमन्यैः ख्यातितत्त्वं...

यदवाचि जयरामन्यायपञ्चाननेन ।

सपदि विमतिवादिव्यूहनिर्वापहारि

प्रतिपदमिदमास्तां कोविदानन्दकारि ॥

स्वस्ति श्रीनृपशालिवाहनशके १७२६ रक्ताक्षनामसंवत्सरे दक्षिणायने वर्षतौ श्रावणमासे नवम्यां भौमवासरे अनूराधानक्षत्रे ब्रह्मनाम-योगे भद्रवाकरणे दिवाष्टघटिकासमये तदा कन्यालग्ने इदं पुस्तकं संपूर्णम् ॥

Subject: Anyathākhyātivādaḥ.

Remarks :—The Ms. is in a fairly good condition. On the title page is given

हे पुस्तक + लिहिले असे ॥

Jayarāmanyāyapañcānana, author of this work, Anyathākhyātivāda, was a pupil of Rāmabhadrasārvabhauma. He flourished about 1700 A. D.

Jayarāma is the author of several works. One of his works, the Nyāyasiddhāntamālā was composed in A. D. 1693.

The present Ms. was copied in Śaka 1726 corresponding to A. D. 1804.

॥ आख्यातवादव्याख्या ॥

6592. ĀKHYĀTAVĀDAVYĀKHYĀ.

S. K. Collection No. 24.

Substance—Paper. Size—11×8½ inches. Sheets—10.

Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Jayarāma. Incomplete. Not printed.

Beginning:

श्रीगणपतये नमः ॥ श्रीभवानीचरणाभ्यां नमः ।

न्यायपञ्चाननः श्रीमान् जयरामः समासतः ।
आख्यातवादव्याख्यानमातनोति मनोरमम् ॥

अनुकूलव्यापारत्वमाख्यातशक्यतावच्छेदकम् । अनुकूलत्वस्य संसर्गत्वात् व्यापारत्वमात्रं तथेत्येके । अनुकूलत्वमात्रं तथेत्यन्ये । धात्वर्थः फलम् अनुकूलत्वव्यापारादिकमाख्यातस्येति मण्डनः । तत्तत्फलावच्छिन्नव्यापारविशेषः तत्तद्धात्वर्थः सङ्ख्यावर्तमानत्वादिकं क्वचिदाश्रयत्वादिकमाख्यातार्थ इति गुरवः । तत्सर्वं निराचिकीर्षुः प्रतिजानीते ।

॥ आख्यातस्येति ॥

End:

कृञः कृतिशक्तौ कृतोऽपि कर्तृत्वशक्त्या कर्तृपदात् कृतिकर्तेति बोधः स्यादिति शङ्कां दृष्टान्तेन निरस्यन् विशेषदर्शनप्रत्युक्तव्यवहारस्याप्रामाणिकत्वात् कर्तृरूपव्यवस्थयेति तदप्रमाणयति ज्ञातेति । स विषयधातुरकर्तृस्थ तामाश्रये.... ।

Subject: Ākhyātavādavyākhyā.

Remarks: —The Ms. is in a fairly good condition.

This work is a commentary on the portion of Raghunātha's Dīdhiti, dealing with verbs.

॥ आख्यातवादटिप्पणम् ॥

6593. ĀKHYĀTAVĀDAṬIPPAṆAM.

S. K. Collection No. 18.

Substance—Paper. Size—10 × 3½ inches. Sheets—44. Lines—9-12 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Raghudeva. Complete. Not printed.

Beginning:

प्रणम्य नीरदश्याममुद्दामगुणमन्दिरम् ।
आख्यातवादसद्व्याख्या रघुदेवेन तन्यते ॥

नैयायिकः परमतं निराकर्तुं प्रथमतः स्वमतं निरूपयति । आख्यातस्येति । यत्नोऽत्राख्यः । यत्नत्वविशिष्टो वाच्यः । यत्नत्वं शक्यतावच्छेदकमिति यावत् । यथाश्रुते यत्नस्य व्यापारान्तर्गतत्वेन व्यापारशक्तिवादिमतव्यवच्छेदाप्रतीतेः ।

End:

क्वचिदाश्रयकत्वादिकमपीति भावाख्यातस्थले आश्रयत्वादेरभावात् । क्वचिदिति । प्रसङ्गादिति । लक्षणादिना तादृशानुभवोपपादने तु लाघवतर्कस्यैव शरणीकरणीयत्वादिति भाव इति दिक् ॥

Colophon:

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिताख्यातवादटिप्पणं समाप्तिमगमत् ।

शेषभट्टसुधीपुत्रबालंभट्टेन धीमता ।

द्रव्यैः संपादितमिदं जगज्ज्ञानातु पुस्तकम् ॥

Subject: Ākhyātavādaṭippaṇa.

Remarks :—The Ms. is in a fairly good condition. On the title page is given;—

'शेषभट्टात्मज बालाख्यस्य'

The author of this Vāda is identical with the commentator of Dīdhiti. This tract represents only a commentary on the portion of the Dīdhiti, dealing with verbs.

॥ ज्ञानलक्षणाविचारः ॥

6594. JÑĀNALAKṢAṆĀVICĀRAḤ.

Burnell's Catalogue No. 10860. Page 121. Left column. Substance—Palm leaf. Size—16¾ × 1½ inches. Leaves—10 (66-75). Lines—13 to a Page. Script—Grantha. No. of Granthas—520. Author—Raghudevabhaṭṭācārya. Complete. Not printed.

Beginning:

(परामर्श) विनानुमितेरनुदयात् अनुमिति.... र्शहेतुरिति सिद्धान्तः। तत्र धूमपरामर्शसत्त्वे घटानुमित्यनुदयात् पर्वताद्युद्देश्यकवन्ह्यादिविधेयकानुमितिं प्रति पर्वतादिविशेष्यकवन्ह्यादिव्याप्य...रकनिश्चयो हेतुरिति विशिष्यकार्यकारणभावः कल्पनीयः।

End:

...आवश्यकञ्च। गुणमानसजनकतावच्छेदकतया

तादृशजातिकल्पनम् । अन्यथा संस्कारादीनां मानसा-

पत्तिरित्यलं सताग्रहणेति? दिक् ।

Colophon:

इति रघुदेवभट्टाचार्यविरचितज्ञानलक्षणाविचारः ।

विलूनशिष्टानि वृषध्वजेन

विहाय धातुर्वदनानि वाणी ।

निःशङ्कमास्ते वदने यदीये

वन्दे गुरूंस्तान् मम रामनाथान् ॥

सोमास्कन्दं परानन्दं कर्पूरधवलं शिवम् ।

रत्नसिंहासनासीनं त्यागराजमहं भजे ॥

Subject: Jñānalakṣaṇāvicāra.

